# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(Old)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – संस्कृतसम्भाषणम् | **कोड –O.E.3.5.5** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – विदुरनीतिशतकम् | |

**प्रथमान्वितिः (Unit 1)** — गुणाः

**प्रश्न १ अधः प्रदत्तेषु द्वयोः पदच्छेदम् अन्वयं भावार्थं च लिखत।** १०

१ निषेवते प्रशस्तानि निन्दितानि न सेवते।
अनास्तिकः श्रद्दधान एतत् पण्डितलक्षणम्॥

२ यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः।
समृद्धिरसमृद्धिर्वा सर्वे पण्डितमुच्यते॥

३ पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः।
पिता माताऽग्निरात्मा च गुरुश्च भरतर्षभ।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ विदूरनीतिशतकानुसारं विद्यार्थिनः गुणान् विस्तरेण लिखत।

२ कः पण्डितः? कः मूर्खः? सश्लोकं विस्तरेण लिखत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनेषु श्लोकेषु द्वयोः पदच्छेदान्वयपुरःसरं भावार्थं च लिखत।** १०

१ वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति॥

२ कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम्।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर॥

३ पूर्वे वयसि तत् कुर्यात् येन वृद्धः सुखं वसेत्।
यावज्जीवेन तत् कुर्यात् येन प्रेत्य सुखं वसेत्॥

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ विदूरनीतेः अनुसारं गुणमहिमानं लिखत।

२ इन्द्रियनिग्रहोपायान् तल्लाभान् च यथाग्रन्थं लिखत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोदत्तेषु द्वयोः पदच्छेदम् अन्वयं भावार्थं च लिखत।** १०

१ सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः॥

२ द्यूतमेतत् पुरा कल्पे दृष्टं वैरकरं नृणाम्।
तस्माद् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्॥

३ चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।
प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति॥

**प्रश्न ६ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ विदूरनीतेः अनुसारं राजधर्मान् निरूपयत।

२ विदूरनीतेः अनुसारं लोभफलानि लिखत।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानाम् उत्तराणि एकैकवाक्येन लिखत।** १०

१ एकपदं मृत्युः किम्?

२ विद्यायाः शत्रवः के?

३ विद्यार्थिन् शब्दस्य पञ्चम्याम् एकवचने किं रूपम्?

४ कीदृशी वाक् कल्याणं करोति?

५ कृ+शतृ+पुं. प्रथमा - एकवचनम् = किं रूपम्?

६ काभिः सह विरोधः न करणीयः?

७ सत्येन कः रक्ष्यते?

८ पाषाणेभ्यः किं प्राप्यते?

९ कः पुनः म्रियते जायते च?

१० नरकस्य + इदम् = (सन्धिं कुरुत)

११ धर्मस्य मार्गः कतिविधः?

१२ गावः केन पश्यन्ति?

१३ न+एकः = (सन्धिं कुरुत)

१४ षट्पदः अर्थात् कः?

१५ रम्+लट्+प्रथमपुरुष+बहुवचनम् = किं रूपम्?